# मूलरामायणम्



अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ।। 1.1.35 ।।
त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।

# द्विकर्म-प्रयोगः

## षोडश द्विकर्मकाः धातवः सन्ति ।

1. दोग्धि (दुह्)
2. याचति (याच्)
3. पचति (पच्)
4. दण्डयति (दण्ड)
5. रुणद्धि (रुध्)
6. पृच्छति (पृच्छ्)
7. चिनोति (चि)
8. ब्रवीति (ब्रू)
9. शास्ति (शास्)
10. जयति (जी)
11. मथ्नाति (मन्थ)
12. हरति (हृ)
13. मुष्णाति (मुष्)
14. नयति (नी)
15. कर्षति (कृष)
16. वहति (वह)

एकं कर्म प्रधानम्, अपरम् अप्रधानं भवति ।

यस्मिन् क्रियापदे द्वितीया-विभक्ति-प्रसङ्गः एव = प्रधानं कर्म

यस्मिन् क्रियापदे अन्य-विभक्ति-प्रसङ्गः = गौणम्

रमेशः अध्यापकं पुस्तकं याचति ।

अजपालः अजां दुग्धं दोग्धि ।

बालिका सहोदरीं प्रश्नं पृच्छति ।

न्यायाधीक्षः अपराधिनं सहस्रलक्ष-रुप्यकं दण्डयति ।

भगिनी तण्डुल-चूर्णं पर्पटीः पचति ।

रावणः सीतां लङ्काम् अपहरति ।

बालिका भक्षणानि विद्यालयं नयति ।

वायुः नौकां समुद्रं वहति ।

गते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजैः ।। 1.1.33 ।।
<u>नियुज्यमानो</u> राज्याय नैच्छद्राज्यं महाबलः ।

## कर्तरिप्रयोगः

बालकः पाठं पठन् अस्ति ।

माता पाकं कुर्वती अस्ति ।

अनुजा चित्रं पश्यन्ती अस्ति ।

## कर्मणिप्रयोगः

बालकेन पाठः पठ्यमानः अस्ति ।

मात्रा पाकः क्रियमाणः अस्ति ।

अनुजया चित्रं दृश्यमानम् अस्ति ।

# कर्मणि शानच्

कर्मपदस्य यल्लिङ्गम्

पठ् = पठ्यते = पठ्यमानः / पठ्यमाना / पठ्यमानम्

लिख् = लिख्यते = लिख्यमानः / लिख्यमाना / लिख्यमानम्

दृश् = दृश्यते = दृश्यमानः / दृश्यमाना / दृश्यमानम्

वन्द् = वन्द्यते = वन्द्यमानः / वन्द्यमाना / वन्द्यमानम्

ईक्ष् = ईक्ष्यते = ईक्ष्यमाणः / ईक्ष्यमाणा / ईक्ष्यमानम्

सेव् = सेव्यते = सेव्यमानः / सेव्यमाना / सेव्यमानम्

# कर्मणि शानच्

कर्मपदस्य यद्वचनम्

छात्रेण पूजाः क्रियन्ते॥

छात्रेण पूजाः क्रियमाणाः सन्ति ।

पित्रा अनुजौ नीयेते ।

पित्रा अनुजौ नीयमानौ स्तः ।

भक्तैः प्रसादः खाद्यते ।

भक्तैः प्रसादः खाद्यमानः अस्ति ।

# कर्मणि शानच्

कर्मपदस्य या विभक्तिः

अस्माभिः चित्रं दृश्यमानम् अस्ति ।

अस्माभिः दृश्यमानं चित्रं किम् इति वदतु ।

अस्माभिः दृश्यमानेन चित्रेण वयं सन्तुष्टाः ।

अस्माभिः दृश्यमानाय चित्राय अधिकं मूल्यं दातव्यम् ।

अस्माभिः दृश्यमानात् चित्रात् नीतिः स्वीकर्तव्या ।

अस्माभिः दृश्यमानस्य चित्रस्य नाम राष्ट्रसेवा ।

अस्माभिः दृश्यमाने चित्रे उत्तमाः तान्त्रिक-अंशाः सन्ति ।

# कर्मणि शानच्

अभ्यासः

अहं कथां लिखामि । भवती शृणोतु ।

मया लिख्यमानां कथां भवती शृणोतु ।

सा शाटिकां ददाति । भवती स्वीकरोतु ।

तया दीयमानां शाटिकां भवती स्वीकरोतु ।

सः संस्कृतं पाठयति । ततः देशसेवां करोति ।

तेन पाठ्यमानात् संस्कृतात् सः देशसेवां करोति ।

स काममनवाप्यैव रामपादावुपस्पृशन् ।। 1.1.38 ।।।
नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ।

(इति अयोध्याकाण्डस्य कथासारः)

पदच्छेदः – सः कामम् अनवाप्य एव राम-पादौ उपस्पृशन् नन्दिग्रामे अकरोत् राज्यं राम-आगमन-काङ्क्षया

पदपरिचयः –
सः कामम् अनवाप्य एव = भरतः रामस्य राज्य-स्वीकरण-रूपम् अभिलाषम् अपूरितम् एव
राम-पादौ उपस्पृशन् = राम-चरण-पादुके नमस्कुर्वन्
नन्दि-ग्रामे अकरोद् राज्यम् = नन्दि-ग्राम-नामके जनपदे प्रजापालनं कृतवान्
राम-आगमन-काङ्क्षया = रामस्य प्रत्यागमन-निरीक्षया

स काममनवाप्यैव रामपादावुपस्पृशन् ।। 1.1.38 ।।।
नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ।

अव + आप् + ल्यप् = अवाप्य

न अवाप्य = अनवाप्य

रामस्य पादौ = रामपादौ (ष.तत्)

उप+स्पृश् + शतृ = उपस्पृशन्

रामस्य आगमनम् = रामागमनम् (ष.तत्)

रामागमनस्य काङ्क्षया = रामागमन-काङ्क्षया (ष.तत्)

अभिलाषः,लिप्सा, ईहा, इच्छा, कामः, वाञ्छा, स्पृहा, तर्षः
मनोरथः, तृट्, काङ्क्षा – अमरः

अन्वयः
सः कामम् अनवाप्य एव रामपादौ उपस्पृशन् नन्दिग्रामे राम-आगमनकाङ्क्षया राज्यम् अकरोत्

# रामायणे अयं सन्दर्भः

लक्ष्मीः चन्द्रादपेयाद् वा हिमवान् वा हिमं त्यजेत् |

अतीयात् सागरो वेलाम् न प्रतिज्ञाम् अहं पितुः || २-११२-१८

कामाद् वा तात लोभाद् वा मात्रा तुभ्यम् इदम् कृतम् |

न तन्मनसि कर्तव्यम् वर्तितव्यम् च मातृवत् || २-११२-१९

अधिरोह आर्य पादाभ्याम् पादुके हेम-भूषिते |

एते हि सर्व-लोकस्य योग-क्षेमं विधास्यतः || २-११२-२१

सो अधिरुह्य नरव्याघ्रः पादुके ह्यवरुह्य च |

प्रायच्छत् सुमहातेजा भरताय महात्मने || २-११२-२२

# रामायणे अयं सन्दर्भः

स पादुके सम्प्रणम्य रामं वचनम्ब्रवीत् |

चतुर्दश हि वर्षाणि जटाचीरधरो ह्यहम् || २-११२-२३

फलमूलाशनो वीर भवेयं रघुनन्दन |

तवागमनमाकाङ्क्षन् वसन्वै नगराद्बहिः || २-११२-२४

तव पादुकयोर्न्यस्तराज्यतन्त्रः परन्तप |

चतुर्दशे तु सम्पूर्णे वर्षेऽहनि रघूत्तम || २-११२-२५

न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् |

गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ।। 1.1.39 ।।
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ।। 1.1.40 ।।

पदच्छेदः – गते तु भरते श्रीमान् सत्यसन्धः जितेन्द्रियः रामः तु पुनः आलक्ष्य नागरस्य जनस्य च तत्र आगमनम् एकाग्रः दण्डकान् प्रविवेश ह

पदपरिचयः –
गते तु भरते = यदा भरतः चित्रकूटात् गतवान् तदा
श्रीमान् सत्यसन्धः जितेन्द्रियः रामः तु = शोभावान् सत्यप्रतिज्ञः इन्द्रियवशी राघवः तु
पुनरालक्ष्य नागरस्य जनस्य च तत्र आगमनम् = अयोध्यानिवासिनः जनसमूहस्य चित्रकूटं प्रति आगमनं सम्भाव्य
एकाग्रः दण्डकान् प्रविवेश ह = स्थिर-चित्तः दण्डकारण्यानि प्रविष्टवान्

गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ।। 1.1.39 ।।
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ।। 1.1.40 ।।

## प्रविवेश

कः
रामः
कीदृशः रामः ?
श्रीमान्
सत्यसन्धः
जितेन्द्रियः
एकाग्रः
कुत्र प्रविवेश?
दणडकान्

कदा प्रविवेश?
भरते गते
किं कृत्वा
आलक्ष्य
किम् आलक्ष्य?
तत्र आगमनम्
कस्य आगमनम्?
नागरस्य जनस्य च

गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ।। 1.1.39 ।।
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ।। 1.1.40 ।।

अन्वयः
भरते गते तु श्रीमान् सत्यसन्धः जितेन्द्रियः एकाग्रः रामः तत्र नागरस्य जनस्य पुनः आगमनम् आलक्ष्य दण्डकान् प्रविवेश ह ।

गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ।। 1.1.39 ।।
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ।। 1.1.40 ।।

श्रीः अस्य अस्ति इति श्रीमान्

सत्या सन्धा (प्रतिज्ञा) यस्य सः = सत्यसन्धः (बहु.व्री)

जितानि इन्द्रियानि येन सः = जितेन्द्रियः (बहु.व्री)

नगरे भवः नागरः, तस्य = नागरस्य

आ+गम्+ल्युट् = आगमनम्

एकस्मिन् अग्रः = एकाग्रः (स.तत्)

प्र + विश् + लिट् (प्रपु.ए.) = प्रविवेश


प्रविश्य तु महारण्यं रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।। 1.1.41 ।।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ।

पदच्छेदः – प्रविश्य तु महारण्यं रामः राजीवलोचनः विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह सुतीक्ष्णं च अपि अगस्त्यं च अगस्त्य-भ्रातरं तथा

प्रविश्य तु महारण्यं रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।। 1.1.41 ।।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ।

पदपरिचयः –

प्रविश्य तु महारण्यं = दण्डकारण्यानि अन्तः गत्वा
रामः राजीवलोचनः = कमलनयनः कौसल्यापुत्रः
विराधं राक्षसं हत्वा = विराध-नामकं निशाचरं मारयित्वा
शरभङ्गं ददर्श ह = शरभङ्ग-नामकं मुनिं दृष्टवान्
सुतीक्ष्णं च अपि अगस्त्यं च अगस्त्य-भ्रातरं तथा = सुतीक्ष्ण-नामकं मुनिं तथा अगस्त्य-मुनिं, अगस्त्यस्य भ्रातरं (सुदर्शन-नामकम्) च (दृष्टवान्)



प्रविश्य तु महारण्यं रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।। 1.1.41 ।।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ।

ददर्श
कः ?
रामः
कीदृशः ?
राजीवलोचनः
कं ददर्श
शरभङ्गं, सुतीक्ष्णम्, अगस्त्यम्, अगस्त्य-भ्रातरं च

कुत्र प्रविश्य ददर्श ?
महारण्यं
किं कृत्वा ददर्श ?
विराधं राक्षसं हत्वा ददर्श

प्रविश्य तु महारण्यं रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।। 1.1.41 ।।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ।

अन्वयः
राजीवलोचनः रामः महारण्यं प्रविश्य विराधं राक्षसं हत्वा शरभङ्गं, सुतीक्ष्णम्, अगस्त्यं, तथा च अगस्त्य-भ्रातरं ददर्श ह ।

प्रविश्य तु महारण्यं रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।। 1.1.41 ।।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ।

प्र + विश् + ल्यप् = प्रविश्य

महद् अरण्यम् = महारण्यम् (कर्मधा)

राजीवः इव लोचने यस्य सः = राजीवलोचनः (बहु.व्री.)

दृश् + लिट् (प्र.पु.ए.) = ददर्श

हन् + त्त्वा = हत्वा

अगं स्त्यायति / स्तभ्नाति इति अगस्त्यः

अटवी, विपिनम्, गहनम्, काननम्, अरण्यम्,
वनम् – अमरः

मार्गं निरोद्धुम् सततं भास्करस्य अचलोत्तमः |
संदेशम् पालयन् तस्य विन्ध्य-शैलो न वर्धते || ४-११-८५
अयं दीर्घायुषः तस्य लोके विश्रुत-कर्मणः |
अगस्त्यस्य आश्रमः श्रीमान् विनीत-मृग-सेवितः || ४-११-८६